# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – नवम्बर-दिसम्बर, २०१६

| | | |
|---|---|---|
| कक्षा – शास्त्रिप्रथमवर्षम् (SEM-1) | **प्रश्नपत्रम् – ५** | गुणाः - ७० |
| विषयः – नव्यन्यायः | **कोड – C.C.1.1.1** | समयः – ०३ तः ०६ पर्यन्तम् |
| दिनाङ्कः – ०९/१२/२०१६ | सन्दर्भग्रन्थः – न्यायसिद्धान्तमुक्तावली | |

विभागः-१

प्रश्नः-१ निम्नेषु द्वयोः व्याख्या साध्या। (०८)

(१) मङ्गलवादं प्रतिपादयत।

(२) कार्यकारणस्वरूपं विवेचयत।

(३) नूतनेति श्लोकं व्याख्यात।

प्रश्नः-२ द्वयोरेकस्य विस्तृतव्याख्या लिखत। (०८)

(१) 'सद्रव्ये'ति श्लोकस्य ग्रन्थपरकत्वं साधु विवेचयत।

(२) "क्षित्यङ्कुरादिकं कर्तृजन्यं कार्यत्वात् घटवत्" प्रतिपादयत।

प्रश्नः-३ द्वयोः टिप्पणीं लिखत । (०४)

(१) ईश्वरास्तित्वे प्रमाणं नास्तीति पूर्वपक्षं स्थापयत।

(२) सप्तपदार्थाः के? व्याख्यात।

(३) शक्ति-सादृश्ययोः अतिरिक्तपदार्थत्वं स्थापयत।

प्रश्नः-४ पञ्चानाम् उत्तराणि एकैकवाक्येन लिखत। (०५)

(१) मुक्तावल्याः कर्ता कः?

(२) मण्यादिसमवहितेन वह्निना दाहो जायते न वा?

(३) नव्यनैयायिकैरनुसारं मङ्गलस्य फलं किम्?

(४) भावपदार्थाः कति ?

(५) संसारमहीरुहस्य बीजं किम्?

(६) विनायकस्तवपाठादिः कुत्र कारणम्?

(७) ईश्वरः केन प्रमाणेन सिद्ध्यति ?

विभागः-२

प्रश्नः-५ निम्नेषु द्वयोः व्याख्या साध्या। (०८)

(१) अभावस्वरूपं यथामुक्तावलि चर्चयत।

(२) कारिकावल्याः कर्तुः परिचयं कारयत।

(३) सामान्यलक्षणं सदलसार्थक्यं निरूपयत।

प्रश्नः-६ द्वयोरेकस्य विस्तृतव्याख्यां लिखत। (०८)

(१) तमसः दशमद्रव्यत्वं प्रतिपाद्य खण्डयत।

(२) जातिबाधकसङ्ग्रहं स्पष्टं व्याख्यात।

प्रश्नः-७ द्वयोरेकस्य पूर्तिः कार्या। (०२)

(१) "अभावस्तु ------------एव च"॥

(२) "सामान्यं ------------परतयोच्यते"॥

प्रश्नः-८ द्वयोरेकस्य पूर्तिः कार्या। (०२)

(१) "व्यापकत्वात् ------------परिकीर्तितः"॥

(२) "उत्क्षेपणं ------------पञ्च च"॥

विभागः-३

प्रश्नः-९ निम्नेषु द्वयोः व्याख्या साध्या। (०८)

(१) सत्तावन्तस्त्रयस्त्वाद्या गुणादिर्निर्गुणक्रियः" स्पष्टयत।

(२) नित्यद्रव्यभिन्नानां साधर्म्यं व्याख्यात।

(३) नवद्रव्याणां साधर्म्याणि प्रतिपादयत।

प्रश्नः-१० द्वयोरेकस्य विस्तृतव्याख्या लिखत। (०८)

(१) कारणलक्षणं उदाहरणसहितं व्याख्यात।

(२) पञ्चान्यथासिद्धयः कारिकाभिः स्पष्टं व्याख्यात।

प्रश्नः-११ द्वयोः टिप्पणीं ददातु। (०४)

(१) सप्तपदार्थानां साधर्म्यानि ।

(२) समवायनिमित्तकारणे ।

(३) असमवायिकारणं ।

प्रश्नः-१२ पञ्चानाम् उत्तराणि एकैकवाक्येन लिखत। (०५)

(१) सत्तायाः परत्वं कथम्?

(२) पटरूपं प्रति असमवायिकारणं किम्?

(३) द्रव्यसामान्यलक्षणं किम्?

(४) भ्रमणादीनां कुत्र अन्तर्भावः?

(५) सत्ता केषां साधर्म्यम्?

(६) अत्यन्ताभावत्वं किम्?

(७) किं नाम भूतत्वम् ?

★★★★★★★★★★

समाधानानि

कक्षा – शास्त्रिप्रथमवर्षम् (SEM-1) **प्रश्नपत्रम् – ५** गुणाः - ७०

विषयः – नव्यन्यायः **कोड – C.C.1.1.1** समयः – ०३ तः ०६ पर्यन्तम्

दिनाङ्कः – ०९/१२/२०१६ सन्दर्भग्रन्थः – न्यायसिद्धान्तमुक्तावली

प्रश्नः - ४

१. श्रीविश्वनाथपञ्चाननभट्टाचार्यः।

२. न जायते।

३. विघ्नध्वंस एव फलम्।

४. षट्।

५. परमात्मा श्रीकृष्णः।

६. विघ्नध्वंसविशेषे।

७. अनुमानप्रमाणेन

प्रश्नः - ७

१. अभावस्तु द्विधा संसर्गाऽन्योन्याभावभेदतः।
प्रागभावस्तथा ध्वंसोऽप्यत्यन्ताभाव एव च॥

२. सामान्यं द्विविधं प्रोक्तं परञ्चापरमेव च।
द्रव्यादित्रिकवृत्तिस्तु सत्ता परतयोच्यते॥

प्रश्नः - ८

१. व्यापकत्वात् पराऽपि स्यात् व्याप्यत्वादपरापि च।
अन्त्यो नित्यद्रव्यवृत्तिर्विशेषः परिकीर्तितः॥

२. उत्क्षेपणं ततोऽपक्षेपणमाकुञ्चनं तथा।
प्रसारणञ्च गमनं कर्माण्येतानि पञ्च च॥

प्रश्नः - १२

१. सकलजात्यपेक्षयाऽधिकदेशवृत्तित्वात्।

२. तन्तुरूपम्।

३. गुणवत्त्वं क्रियावत्त्वं वा।

४. गमने।

५. द्रव्यगुणकर्मणाम्।

६. नित्यसंसर्गाभावत्वम्।

७. बहिरिन्द्रियगाह्यविशेषगुणवत्त्वम् ।